# Shri Ramayana Tatparya Sangraha Stotram

# શ્રીરામાયણતાત્પર્યસઙ્ગ્રહસ્તોત્રમ્

## Document Information

Text title : Shri Ramayana Tatparya Sangraha Stotram

File name : rAmAyaNatAtparyasangrahastotram.itx

Category : major_works, appayya-dIkShita, raama, shiva

Location : doc_z_misc_major_works

Author : Appayya Dixit

Transliterated by : Rama Prakasha ramaprakashak at gmail.com

Proofread by : Rama Prakasha ramaprakashak at gmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# શ્રીરામાયણતાત્પર્યસઙ્ગ્રહસ્તોત્રમ્

વાલ્મીકિરાદિકવિરાટ્ અખિલાર્થદર્શી
    સાક્ષાદ્વિરિઞ્ચ ઇવ સંપ્રતિપન્નભાવઃ ।
વિશ્વેશ વિષ્ણુમધિકૃત્ય કૃતે પ્રબન્ધે
    વ્યક્ત્યા તવૈવ નિબબન્ધ પરં પરત્વમ્ ॥ ૧॥

રામાયણે હિ કલશપ્રભવાશ્રમસ્થા
    દેવાદયોઽપિ તમુપાસત ઇત્યુદીર્ય ।
સ્થાનાનિ ચાત્ર મધુજિન્મઘવન્મુખાનાં
    તસ્યાશ્રમે નિગદિતાનિ ન તે કપર્દિન્ ॥ ૨॥

તેનત્વમેવ નનુ સિદ્ધ્યસિ પારિશેષ્યા-
    ત્તસ્યેન્દુશેખર તપોનિકરૈરુપાસ્યઃ ।
તસ્યાપ્યુપાસકતયા વિનિવેશિતેભ્યઃ
    તેભ્યસ્તવત્વતિતરાં મહિમા પ્રસિદ્ધ્યેત્ ॥ ૩॥

અત્યન્તપૂજ્ય વિષયં કિલયત્પ્રસિદ્ધં
    શ્રીમદ્વિશેષણમિદં હરિમૂર્તિરૂપાત્ ।
અસ્માત્વદાસ્રમધિકં કિમપિ ત્રિશૂલં
    વ્યઙ્ક્તું ત્વયીવ ન પરત્ર નિવેશિતં તત્ ॥ ૪॥

કુમ્ભોદ્ભવસ્ય સુરસંસદુપાસ્યતા ચ
    શ્રીમદ્વિશેષણમિદં ચ તવેન્દુમૌલે ।
શ્રીરામચન્દ્ર વચનેવિતિ તન્નિબન્ધઃ
    તસ્યાપિ ભક્તિમધિકાં ભવતિ વ્યનક્તિ ॥ ૫॥

યસ્યાસ્તિ હિ સ્મ શિબિરં શિવદક્ષિણાગ્રે
    કુક્ષિઙ્ગતે જલનિધેર્નલસેતુ કૢપ્ત્યૈ ।
તસ્મિન્ જગદ્વિદિત ભૂમનિ સેતુબન્ધે
    પૂર્વં પ્રસન્ન ઇતિ ચ ત્વયિ ભક્તિમૂચે ॥ ૬॥

શ્રાન્તસ્સુદીર્ઘસમરેણ રઘુપ્રવીર-
    શ્ચિઆન્તાકુલઃ કલશયોનિકૃતોપદેશઃ ।
બ્રહ્મચ્યુતત્રિણયનેશ ભવત્સ્વરૂપં
    સ્તોત્રેણ યદ્રિપુજયાય રવિં પ્રપન્નઃ ॥ ૭॥

રક્ષોધિપો નિહત એવ દિવં પ્રયાહિ
    કાર્યં કૃતં ખલુ નઃ ઇત્યુદિતે વિધાત્રા ।
રાજ્યસ્થિતઃ કુરુતુરઙ્ગમમેધયજ્ઞ
    મિત્યુક્તમેવજગૃહે તવ યચ્ચશમ્ભો ॥ ૮॥

ઇક્ષ્વાકુવંશ ભવરાજ્યપદે નિવિષ્ટઃ
    ત્વામેવ યચ્ચ સુચિરં હયમેધક્લૃપ્ત્યા ।
ઈજેકથાન્તર ગિરા શિવતેન ચક્રી
    યષ્ટવ્ય ઇત્યવરજસ્ય નિરસ્ય ભાવમ્ ॥ ૯॥

એતૈસ્ત્વયિ પ્રકટિતા રઘુનન્દનસ્ય
    ભક્તિઃ સ્થિરા પરતરત્વમતિશ્ચ નિત્યા ।
સુવ્યક્તમાદિકવિના સ્વયમાત્મનશ્ચ
    રુદ્રસ્સવિષ્ણુરિવ ચેત્યુપમોક્તિભઙ્ગ્યા ॥ ૧૦॥

સંવત્સરં વરદ વાસયિતું પ્રવૃત્તઃ
    સીતાં દશાનનગૃહે જગતાં નિયન્તુઃ ।
સઙ્કલ્પ એવ તવ તદ્વસતેરબોધે
    રામસ્ય હેતુરિતિ ભાવમમુષ્ય મન્યે ॥ ૧૧॥

સીતાપહારમવલોક્ય રઘૂત્તમાય
    બ્રૂયુર્નજાત્વિતિ મુનિઃ વિદિતત્વદાજ્ઞઃ ।
પૃષ્ટો યદસ્ય રઘુચન્દ્રમસા નિવાસં
    ઉક્ત્વાગતઃ ખગપતિઃ કિયદન્યદન્યત્ ॥ ૧૨॥

સંસૂચ્ય વક્ષ્ય ઇતિ નાહ કબન્ધ એત-
    દજ્ઞાનમભ્યનયદત્ર ચ સૂર્યસૂનુઃ ।
ઉક્તં હિ તત્ર ભગવન્નનિમિત્તમન્યત્
    સઙ્કલ્પ એવ ભવતશ્શિવ તસ્ય દૃષ્ટિઃ ॥ ૧૩॥

જ્ઞાતેરિપું રઘુપતિઃ લઘુસઞ્જિહીર્ષેત્

યઃક્રોધતઃ સમજિહીર્ષદશેષલોકાન્ ।
મોઘો ભવેચ્છિવતદા નિહતે રિપૌ તે
સઙ્કલ્પ એવ ન હતેતુ તદીયબાણઃ ॥ ૧૪॥

તત્રોદ્યતે સકલસંહરણાય ભીત્યા
સદ્યો દશાનનવધોસ્ત્વિતિ વાઞ્છયા ચ ।
યન્નાહરોપિત શરન્તમુપેત્યદેવઃ
તત્રાપિ સર્વજગદીશ સ એવ હેતુઃ ॥ ૧૫॥

ગઙ્ગાશિવેશિરસિતે પતનેન પુણ્યા
પાપાપનોદન વિનોદપટીયસીતિ ।
દેવાદયોઽપિ વસુધાતલ વાસમાપ્તાઃ
સ્નાતાસ્તથેતિ સ વચો નિબબન્ધ ચાર્ષમ્ ॥ ૧૬॥

નારાયણસ્ય ધનુષસ્તવ ભીમચાપાત્
ઉત્કૃષ્ટતાં ગણયતઃ કિલ ભાર્ગવસ્ય ।
યન્મેનિરેત્વદધિકં તમિતીવવાક્યં
તદ્બાધિતં ચ વચનેન રઘૂદ્વહસ્ય ॥ ૧૭॥

દૃપ્તસ્ય કોપકલુષસ્ય વચઃ કિલાદ્યં
ધર્મસ્ય વિગ્રહવતસ્તુ વચોદ્વિતીયમ્ ।
યુદ્ધે ક્વચિત્ત્વદધિકત્વમરેર્વચશ્ચ
ત્વદ્દત્તસત્યવરનિર્વહણાયયુક્તમ્ ॥ ૧૮॥

ઇત્થં તવ શ્રુતિશત પ્રથિતં પરત્વં
પ્રાધાન્યતઃ સ્મરહર પ્રતિપાદનીયમ્ ।
દ્વારં તુ રામચરિતં કવિના ગૃહીતં-
રામાયણે મહિતં ઉત્તમકાવ્યરત્ને ॥ ૧૯॥

કેચિદ્વિભીષણસમાચરિતં પ્રધાનં
કોણે શ્રુતં પ્રપદનં પ્રતિપાદ્યમાહુઃ ।
પ્રાધાન્યમત્ર કથમુત્તમનામ્નિ કાવ્યે-
વાચ્યાતિશાયિવિષયાર્થિ તદશ્નુવીત ॥ ૨૦॥

સ્યાચ્ચેત્તદીશફલગૌરવતઃ પ્રધાનં
ઇક્ષ્વાકુ-નાયક સમાચરિતં તથા સ્યાત્ ।
તચ્ચાપિ વાયસકૃતં ધનલાભતોઽપિ

દારાત્મલાભમધિકં હિ બુધા વદન્તિ ॥ ૨૧॥

તચ્ચેદ્વિમુક્તિફલકં ફલગૌરવં સ્યાત્
રાજ્યેપ્સયૈવ તુ કૃતં તદિતિ પ્રસિદ્ધમ્ ।
શ્રીરામચન્દ્રપવનાત્મજયોશ્ચ સૂક્ત્યા
સાક્ષાચ્ચ તસ્ય વચનેન વિભીષણસ્ય ॥ ૨૨॥

લઙ્કા સુહૃદ્ધન સુખાનુભવાદિ સર્વં
ત્યક્તં મયેતિ તુ વચો ન તતો વિરક્ત્યા ।
શ્રીરામચન્દ્રકરુણા કટાક્ષલબ્ધે
તત્રૈવ રાગપિશુનઃ ખલુ વાક્યશેષઃ ॥ ૨૩॥

જ્ઞાત્વાતદીપ્સિતમતોઽથ રઘુપ્રવીરઃ
તેનૈવ રાવણબલાદિ ચ વાચયિત્વા ।
કૃત્વા ચ રાવણતદિષ્ટવધ પ્રતિજ્ઞાં
રાજ્યાધિપત્યમદદાં અભિષેકપૂર્વમ્ ॥ ૨૪॥

પ્રાચેતસાય કવયે પ્રથમાય તસ્મૈ
તત્કાવ્યહારતરળાય ચ રાઘવાય ।
વિશ્વાત્મને તદુભયસ્થિર ભાવલક્ષ્ય
મુખ્યાસ્પદાય વિભવે ચ નમશ્શિવાય ॥ ૨૫॥

ઇતિ શ્રીઅપ્પય્યદીક્ષિતવિરચિતં શ્રીરામાયણતાત્પર્યસઙ્ગ્રહસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rama Prakasha ramaprakashak at gmail.com

---

*Shri Ramayana Tatparya Sangraha Stotram*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*